संस्कृतवार्ता:

दिनाङ्क :-10.04.2025 प्रात: - 06:55

**अथ वार्ताः**

**अमित शाहः**

केन्द्रीयः गृहमन्त्री अमितशाहः प्रोक्तवान् यत् अष्टोत्तर द्विसहस्रतमे वर्षे मुम्बई- आतंकि आक्रमणेषु अभियुक्तस्य "तहव्वुर राणा" इत्येतस्य भारतं प्रत्यर्पणं निश्चयेन मोदी- शासनस्य महती सफलता दरीदृश्यते। श्री शाहः प्रोक्तवान् यत् भारतं प्रति कृतदुर्व्यवहार- अभियुक्तानां प्रत्यर्पणं भारत शासनस्य उत्तरदायित्वमिति। श्री शाहः प्रतिपादितवान् यत् एतत् देशाय महती उपलब्धिः भविष्यति यत् तहव्वुर राणा इत्येतस्य भारतीय – न्यायालये वादश्रवणं भविष्यति। सूत्रानुसारि अवधेयास्पदं यत् तहव्वुर – राणा इत्यसौ अद्य विशेष- विमानेन भारतं प्रत्यानयिष्यते। अमेरिकीय- न्यायालयेन राणा इत्येतस्य स्वीय प्रत्यर्पणं विरूध्य प्रस्तुता याचिका निरस्तीकृतासीत्।

**राष्ट्रपति – स्लोवाकिया**

राष्ट्रपति- पदासीना द्रौपदी मुर्मुः स्लोवाकिया- देशस्य राजकीय- यात्रायां प्रवर्तते। गतदिने ब्रातिस्लावा इत्यत्र स्लोवाकिया- देशस्य स्वीय समकक्षेण पीटर पेलेग्रिनी इत्यमुना साकं उपवेशनानन्तरं प्रतिनिधि- मण्डल स्तरीय – वार्ता अपि राष्ट्रपतिना समनुष्ठिता। उभाभ्यां मध्ये द्विपक्षीय- सम्बन्धानां विभिन्नेषु पक्षेषु अथ वैश्विक- क्षेत्रीय- हित प्रकरणेषु अपि चर्चा समायोजिता।

उभाभ्यां मध्ये द्वि- अनुबन्धयोः अपि आदान- प्रदानं जातम्। राष्ट्रपतिः भारतस्य संचार- मनोरंजन- रचनात्मक- अर्थव्यवस्था- क्षेत्रेषु उभयोः देशयोः मध्ये सहयोग- सम्भावनासु अपि उद्बोधनं दत्तवती। राष्ट्रपतिः मुर्मुः स्लोवाकिया- गणराज्यस्य प्रधानमन्त्रिणा रॉबर्ट – पिको इत्यमुना साकं अपि मेलनं कृतवती।

**अश्विनी वैष्णव**

सूचना – प्रविधि – मन्त्री अश्विनी वैष्णवः प्रोक्तवान् यत् नूतनं आधार- विधि- नियमम् डिजीटल पर्सनल डेटा प्रोटेक्शन एक्ट इति विधि नियमेन सह सामंजस्य रूपेण संस्थापयिष्यते यत्र उपभोक्तृणां हितानि केन्द्ररूपेण प्रवर्तयिष्यन्ते।

**ट्रम्पः-आयातशुल्कः**

अमेरिकायाः राष्ट्रपतिः डोनाल्ड-ट्रंपः चीनदेशात् आयातितेषु वस्तुसु चतुरधिकैकशतं प्रतिशन्मितं आयातशुल्कः संस्थापितवान् । नवीनायातसंरचना चीनद्वारा अमेरिकीयातेषु वस्तुसु प्रख्यापितं चतुस्त्रिंशत्-प्रतिशन्मितम् आयातशुल्कं प्रतिग्रहीतुं ट्रम्पस्य प्रत्युत्तररूपेण समुपागच्छत्।

## आईपीएल

इण्डियन प्रीमियर- लीग् इत्येतस्यां क्रिकेट् – प्रतिस्पर्धायां गतरात्रौ अहमदाबादस्थे नरेन्द्रमोदि- क्रीडांगणे समायोजिते द्वन्द्वे गुजरात- टाइटंस इत्येतेन दलेन राजस्थान- रॉयल्स इति दलं अष्टपञ्चाशत्- धावनांकैः पराजितम्। प्रथमं दण्डेन क्रीडयता गुजरात टाइटंस इत्येतेन दलेन सप्तदशाधिक द्विशतं धावनांकाः समर्जिताः यत्र साई सुदर्शनः अर्धशतकीयं प्रदर्शनं कृतवान्। प्रत्युत्तरे राजस्थान- दलस्य पर्यायः एकोनषष्ट्युत्तर- शतं धावनांकेषु एव समाप्तो जातः।

साई सुदर्शनः स्पर्धा नायकत्वेन चितः। अद्य आईपीएल प्रतिस्पर्धायां रॉयल चैलेंजर्स- बैंग्लोर- इति दलं देहली केपिटल्स इति दलं विरूध्य क्रीडिष्यति।

इति वार्ताः